योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०९८

अष्टनवतितमः सर्गः ९८

श्रीवसिष्ठ उवाच ।

विवेकिनो विरक्ता ये विश्रान्ता ये परे पदे ।

तेषां तनुत्वमायान्ति लोभमोहादयोऽरयः ।। १

न हृष्यन्ति न कुप्यन्ति नाविशन्त्याहरन्ति च ।

उद्विजन्तेऽपि नो लोकाल्लोकान्नोद्वेजयन्ति च ।। २

न नास्तिक्यान्न चास्तिक्यात्कष्टानुष्ठानवैदिकाः ।

मनोज्ञमधुराचाराः प्रियपेशलवादिनः ।। ३

सङ्गादाह्लादयन्त्यन्तः शशाङ्ककिरणा इव ।

विवेचितारः कार्याणां निर्णेतारः क्षणादपि ।। ४

अनुद्वेगकराचारा बान्धवा नागरा इव ।

बहिः सर्वसमाचारा अन्तः सर्वार्थशीतलाः ।। ५

शास्त्रार्थरसिकास्तज्ज्ञा ज्ञातलोकपरावराः ।

हेयोपादेयवेत्तारो यथाप्राप्ताभिपातिनः ।। ६

विरुद्धकार्यविरता रसिका सज्जनस्थितौ ।

अनावरणसौगन्ध्यैः परास्पदसुखाशनैः ।। ७

पूजयन्त्यागतं फुल्ला भृङ्गं पद्मा इवार्थिनम् ।

आवर्जयन्ति जनतां जनतापापहारिणः ।। ८

शीतलास्पदवत्स्निग्धाः प्रावृषीव पयोधराः ।

भूभृद्भङ्गकरं धीरा देशभङ्गदमाकुलम् ।। ९

रोधयन्त्यागतं क्षोभं भूकम्पमिव पर्वताः ।

उत्साहयन्ति विपदि सुखयन्ति च संपदि ।। १०

चन्द्रबिम्बोपमाकारा दारा इव गुणाकराः ।

यशःपुष्पामलदिशो भाविसत्फलहेतवः ।। ११

पुंस्कोकिलसमालापा माधवा इव साधवः ।

कल्लोलबहुलावर्तं व्यामोहमकरालयम् ।। १२

लुठन्तमिव हेमन्तं लोडयन्तं जनास्पदम् ।

वीचिविक्षोभचपलं परचित्तमहार्णवम् ।। १३

तच्च रोधयितुं शक्तास्तटस्थाः साधुपर्वताः ।

आपत्सु बुद्धिनाशेषु कल्लोलेष्वाकुलेषु च ।। १४

संकटेषु दुरन्तेषु सन्त एव गतिः सताम् ।

एभिश्चिह्नैरथान्यैश्च ज्ञात्वा तानुचिताशयान् ।। १५

आश्रयेतैकविश्रान्त्यै श्रान्तः संसारवर्त्मना ।

यस्मादत्यन्तविषमः संसारोरगसागरः ।। १६

विना सत्सङ्गमन्येन पोतकेन न तीर्यते ।

आस्तां किं मे विचारेण यद्भवेदस्तु तन्मम ।। १७

इत्यन्तः कल्कमासाद्य न स्थेयं गर्तकीटवत् ।

एकोऽपि विद्यते यस्य गुणस्तं सर्वमुत्सृजन् ।। १८

अनादृतान्यतद्दोषं तावन्मात्रं समाश्रयेत् ।

गुणान्दोषांश्च विज्ञातुमाबाल्यात्स्वप्रयत्नतः ।। १९

यथासंभवसत्सङ्गशास्त्रैः प्राग्धियमेधयेत् ।

दोषलेशमनादृत्य नित्यं सेवेत सज्जनम् ।। २०

स्थूलदोषं त्वनिर्वाणं शनैः परिहरेत्क्रमात् ।

याति रम्यमरम्यत्वं स्थिरमस्थिरतामपि ।। २१

यथा दृष्टं तथा मन्ये याति साधुरसाधुताम् ।

एष सोऽत्यन्त उत्पातो यः साधुर्याति दुष्टताम् ।।२२

देशकालवशात्पापैर्महोत्पातोऽपि दृश्यते ।

सर्वकर्माणि संत्यज्य कुर्यात्सज्जनसंगमम् ।

एतत्कर्म निराबाधं लोकद्वितयसाधनम् ।। २३

न सज्जनाद्दूरतरः क्वचिद्भवे-

द्भजेत साधून्विनयक्रियान्वितः ।

स्पृशन्त्ययत्नेन हि तत्समीपगं

विसारिणस्तद्गतपुष्परेणवः ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उ० सज्जनसमागमप्रशंसा नामाष्टनवतितमः सर्गः ।। ९८ ।।